In Public domain. Digitization Muthulakshmi Research Academy

89

129

रुद्राक्षमाहात्म्यम्॥

॥ रुद्राक्षमहिमा ॥

॥ अथ रुद्राक्षमहिमोत्पत्तिधारणादि प्रकाश्यते ॥

स्कान्दे—

कण्ठेमूर्ध्न्युपवीते वा कर्णे करयुगेऽथवा।
रुद्राक्षन्धारयेन्नित्यं भक्त्या परमया युतः॥ १॥

किमत्र बहुनोक्तेन वर्णनेन पुनः पुनः।
रुद्राक्षधारणन्नित्यन्तस्मादेव प्रशस्यते॥ २॥

वायवीये—

रुद्राक्षन्धारयेन्मूर्ध्नि कण्ठे श्रोत्रे करेऽथवा।
सुवर्णमणि विच्छिन्नं धृवन्नान्यैर्धृतं शिवम्॥ ३॥

नाशुचिर्द्धारयेदक्षं सदाभक्त्यैवधारयेत्।

पुराणान्तरे—

श्राद्धेकर्म्मणि यज्ञे च प्रायश्चित्ते सुरार्चने॥ ४॥

होमे जपे च रुद्राक्षं दीक्षाकाले च धारयेत्।

स्कान्दे—

न विभूतिर्यस्य फाले नांगे रुद्राक्षधारणम्॥ ५॥

न शंभोर्भवने पूजा स विप्रश्वपचाधमः।

तत्रैव—

---

3. Cf. *Śivamahāpurāṇa*, *Vāyavīyasaṃhitā* 21:35c–36b:
रुद्राक्षान्धारयेन्मूर्ध्नि कंठे श्रोते करे तथा ।
सुवर्णवर्णमच्छिन्नं शुभं नान्यैर्धृतं शुभम्॥

5. Cf. *Śivamahāpurāṇa*, *Vāyavīyasaṃhitā* 23:13:
विभूतिर्यस्य नो भाले नांगे रुद्राक्षधारणम्।
नास्ये शिवमयी वाणी तं त्यजेदधमं यथा॥

---

3 कण्ठे श्रोत्रे] *conj.*; कर्णे सूत्रे K 5 नांगे] *conj.*; ना — K

In Public domain. Digitization Muthulakshmi Research Academy

रुद्राक्षधारणे लज्जा येषामस्ति महामुने॥। ६॥

तेषां नास्ति विनिर्म्मोक्षस्संसाराज्जन्मकोटिभिः।
स्नानेदानेजपेहोमे वैश्वदेवे सुरार्चने॥ ७॥

प्रायश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः।
अरुद्राक्षधरोभूत्वा यत्किञ्चित् कर्मवैदिकम्॥ ८॥

कुर्वन्विप्रस्तु मोहेन नरके पतते ध्रुवं।
रुद्राक्षन्धारयेद्विप्रस्सन्ध्यादिषु च कर्मसु॥ ९॥

दानेतपसियज्ञे च प्रायश्चित्ते सुरार्चने।
इमानि नित्यत्वसाधनानि वचनानि। अथ काम्यत्वसाधकानि —
पराशरे —

रुद्राक्षधारणं कार्यं सर्वैश्श्रेयोर्थिभिर्नृभिः॥ १०॥

कर्णपाशे शि— ह्न कर्णे हस्ते शुकादरात्।
वासिष्ठलैंगे —

रुद्राक्षधारणाद्रुद्रो भवत्येव न संशयः॥ ११॥
वासिष्ठलैंगे एव —

हारं वा कटकं वापि तथान्यद्वा द्विजोत्तमा।
रुद्राक्षसहितं भक्त्या कारयेद्रुद्रतामियात्॥ १२॥

तत्रैव —
रुद्राक्षं केवलं वापि यत्र कुत्र महामुने।
अमन्त्रकं वा मन्त्रेणसहितं भाववर्जितम्॥ १३॥

7c–10b. Cf. *Merutantram*, 6:358c–60b:
स्नाने दाने जपे होमे वैश्वदेवे सुरार्चने ॥
प्रायश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः ॥
रुद्राक्षधारी भूत्वा च यत्किञ्चित्कर्म वैदिकम् ॥
यो विप्रः सततं कुर्यात्तत्कर्म सफलं भवेत् ॥

---

10 काम्यत्व] *conj.*; का — त्व K 10 °र्थिभिर्नृभिः] *conj.*; °र्थिर्नृभिः K (unmetrical)
11 संशयः] *em.*; संश — K 11 वासिष्ठलिंगे] *conj.*; वासिष्ठलिंग K

In Public domain. Digitization Muthulakshmi Research Academy

यो वा को वा नरो नित्यं धारयेल्लज्जया विना।
सर्वपापविनिर्मुक्तस्सम्यग्ज्ञानमवाप्नुयात्॥ १४॥

गारुडे—

रुद्राक्षतरुसंभूतवातोद्धूतकणान्यपि।
पुण्यलोकं गमिष्यन्ति पुनरावृत्ति दुर्लभम्॥ १५॥

बृहन्नारदीये—

व्याहरन्ति च नामानि ये शंभोः पामरात्मनः।
रुद्राक्षालंकृता ये च ते वै भागवतोत्तमाः॥ १६॥

स्कान्दे—

फलस्य दर्शनं पुण्यं स्पर्शात् कोटिगुणं भवेत्।
शतकोटिगुणं पुण्यं धारणाल्लभते नरः॥ १७॥

लक्षकोटिसहस्राणि लक्षकोटि शतानि च।
जपाच्च लभते नित्यं नात्रकार्या विचारणा॥ १८॥

हस्तेचोरसिकण्ठे तु कर्णयोर्म्मस्तके तथा।
रुद्राक्षं धारयेद्यस्तु स रुद्रो नात्रसंशयः॥ १९॥

स्कान्दे एव—

मृण्मयंवापि रुद्राक्षं कृत्वा यत्नेन धारयेत्।
कुलैकविंशमुद्धृत्य शिवलोके महीयते॥ २०॥

तत्रैव—

सर्वयज्ञतपोदानं वेदाभ्यासैश्च यत्फलम्।
तत्फलं लभते सद्यो रुद्राक्षस्य च धारणात्॥ २१॥

वेदैश्चतुर्भिर्यत्पुण्यं पुराणपठनेपि च।
यत्तीर्थगमनेचैव सर्वविद्यार्थिभिस्तथा॥ २२॥

तत्पुण्यं लभते सर्वं रुद्राक्षस्य तु धारणात्।

---

16 पामरात्मनः] *conj.*; प --- रात्मनः K 19 कण्ठे तु कर्ण॰] *conj.*; कण्ठे --- कर्ण॰ K

In Public domain. Digitization Muthulakshmi Research Academy

प्रयाणकाले रुद्राक्षं भक्षयित्वा मृयेद्यदि॥ २३॥

स रुद्रत्वमवाप्नोति पुनर्जन्म न विद्यते।
रुद्राक्षं धारयन्कर्णे बाहोर्वा मृयते यदि॥ २४॥

कुलैकविंशमुत्तार्य रुद्रलोके वसेन्नरः।
ब्राह्मणोवापि चण्डालो दुर्गुणस्सगुणोपि वा॥ २५॥

भस्मरुद्राक्षधारीयस्स देहान्ते शिवं व्रजेत्।
शुचिर्वाप्यशुचिर्वाथाऽभक्षस्य च भक्षकः॥ २६॥

म्लेच्छोवाप्यथचण्डालो युक्तो वा स तु पातकैः।
रुद्राक्षधारणादेव स रुद्रोनात्रसंशयः॥ २७॥

शिरसा धारिते कोटिः कर्णयोर्द्दशकोटयः।
शतकोटिर्गळेवन्धे मूर्ध्नि कोटिसहस्रकम्॥ २८॥

अयुतञ्चोपवीते तु लक्षकोटिर्भुजे धृते॥
अश्वमेधम्मणिन्धे तु रुद्राक्षं मोक्षसाधनम्॥ २९॥

रुद्राक्षधारको भूत्वा यत्किञ्चित् कर्म्मवैदिकम्।
कुर्वन्विप्रस्सदाभक्त्या महदाप्नोति तत्फलम्॥ इति॥ ३०॥

अभिज्ञोवानभिज्ञो वा रुद्राक्षस्स तु धारणात्।
शिवलोकं प्रपद्येत कीकटे गर्द्दभो यथा॥ ३१॥

रुद्राक्षमदधाद्देव गर्द्दभः केन हेतुना।
कीकटं केन वा प्राप्तस्सर्वज्ञपरमेश्वर॥ ३२॥

श्रुणु पुत्र पुरावृत्तं गर्द्दभो विन्ध्यपर्वते।
धत्ते रुद्राक्षभारन्तु वाहितः पथिकेन वै॥ ३३॥

23c–24b. Cf. *Suprabhedāgama, Caryāpāda* 6:76
प्रयाणकाले रुद्राक्षं भक्षयित्वा मृतन्तु ये ।
ते रुद्र पदमाप्नोति पुनर्जन्म न विद्यते ॥

---

27 स तु पातकैः] *conj.*; स पातकैः K **28** °दशकोटयः] *conj.*; °दशको --- : K
29 भुजे धृते] *conj.*; भुजे — ते K

In Public domain. Digitization Muthulakshmi Research Academy

श्रान्तोऽसमर्थस्तत्भारं वोढुं पतितवान् भुवि।
त्यक्तः प्राणस्त्रिणेत्रस्तु शूलपाणिर्म्महेश्वरः॥ ३४॥

मत्प्रसादान्महासेनः ममान्तिकमुपागतः॥
यावद्वक्त्रस्य संख्यानां रुद्राक्षाणां सगर्द्दभः॥ ३५॥

तावद्युगसहस्राणि शिवलोके महीयते॥
रुद्राक्षधारणाच्छ्रेष्ठन्नकिञ्चिदिह विद्यते॥ ३६॥

अमन्त्रधारणस्येव गुणा एते प्रकीर्तिताः।
यः पुनर्म्मन्त्रसंयुक्तन्धारयेत् भक्तितो नरः॥ ३७॥

गुणानान्तस्यमाहात्म्यं कथितुन्नैव शक्यते।
एतेचैव गुणावत्स तव प्रीत्या मयोदिताः॥ ३८॥

स्व शिष्येभ्यश्च वक्तव्यन्नाशिष्येभ्यः कदाचन।
अभक्तस्यापि मूर्खस्य न कदाचित् प्रकाशयेत्॥ ३९॥

स्कान्दे एव—

लक्षञ्चश्रवणे पुण्यं कोटिर्भवति दर्शनात्।
दशकोटि सहस्राणि धारणाल्लभते नरः॥ ४०॥

लक्षकोटिसहस्राणि लक्षकोटि शतानि च।
जपैकाल्लभते पुण्यन्नात्रकार्या विचारणा॥ ४१॥

ब्रह्मकैवर्त्ते—

रुद्राक्षाष्टशतेन येनकलिता माला सदा धार्यते
कण्ठे तेन लभेत् क्षणात् क्षणमहो पुण्यं ह येज्याधिकम्।
विन्ध्यादौमृदकः खरोवियदभूद्रुद्राक्षभारासहः
कैलासे शतकल्पमीशस्सदृशो हाहानवद्ये गणः॥ ४२॥

स्नाने वा जपहोमयोर्व्रततिथौ देवार्च्चनादानयो
र्द्दीक्षाश्राद्धकयो कृतौ स भवितो रुद्राक्षमालाधरः।

---

35 महासेनः] *conj.*; महासे --- K 36 विद्यते] *conj.*; विष्यते K 39 शिष्येभ्यश्च] *conj.*; शिष्येश्च K 42 येनकलिता] *conj.*; --- नकलिता K 43 कृतौ स भवितो] *conj.*; --- तौ स भसितो K

In Public domain. Digitization Muthulakshmi Research Academy

कुर्यात्कर्म्म स वैदिकञ्च सकलं स्यादक्षयन् तत्फलं
नो चेद्व्यर्थमिदं भवत्ययमहो पापोऽनवद्योर्ध्भुवम्॥ ४३॥

पापिष्ठोपि नरोऽक्षमेकमपि वा धत्ते च शुद्धो भवेत्
कुर्वन्वापि नलिप्यते ह्यनुचितैस्तत्तन्मुखाक्षोदितैः।
पुच्छं योज्यमुखं मुखेनसदृशैर्म्मुक्ताप्रवालान्तरै
स्सौवर्णैर्म्मणिभिर्दधन्मखफलं मर्त्योऽनवद्यो भवेत्॥ ४४॥

रुद्राक्षं वपुषादधद्यदिमृतश्वानोपि मुक्तोभवेत्
खादन्यन्त्यमुभुक्तके शिवपुरं गच्छेद्धनो जायते।
किन्तूक्तैर्वहुभिस्समन्त्रकमिदं स्वांगे सदा धारक
स्संसारं न पुनः प्रयाति मनुजो वक्ष्येनवद्येतव॥ ४५॥

केचित्सूतकशावयोर्ज्जलमलोत्सर्गे च सङ्गेस्त्रियोः
शुद्धावक्षकमालिकां न दधेस्वायुक्षयस्यादिति।
अन्ये पापहरं सदाधृतमिति प्रोचुर्भुजेकर्णयोः
रक्षन्मन्त्रपुरस्सरन्तु महती माला न धार्याऽशुचौ॥ ४६॥

रुद्राक्षद्रुमपत्रपल्लवपुटस्पृष्टानिलस्पर्शना
द्दूरस्थास्तरवस्तृणान्यपि ⊔ यान्त्यक्षयं तत्पदम्।
तत्पुण्यद्रुमजातलक्षणमणिं बिभ्रत्यजस्रं नरो
मुच्येत्संसृतिबन्धनादिति पुनश्चित्रन्नकिञ्चित् प्रिये॥ ४७॥
॥ देवीं प्रति शिववचनम्॥

ईश्वरः—

जावालोपनिषत्स्वाध्वी ममज्ञानस्य सिद्धये।
प्रधानसाधनान्याह प्राणिनामादरेण तु॥ ४८॥

अविमुक्तम्ममक्षेत्रं मन्नाम परमं शुभम्।
शतरुद्रीयसंज्ञञ्च तथा सन्यासमुत्तमम्॥ ४९॥

भस्मनोद्धूलनन्तद्वत्त्रिपुण्ड्रस्य च धारणम्।
रुद्राक्षधारणं साक्षाच्छिवशव्दजपस्तदा॥ ५०॥

---

43 पापोऽनवद्योर्ध्भुवम्] *conj.*; पापेन्नवद्येर्ध्भुवम् K 44 मर्त्योऽनवद्यो] *conj.*; मर्त्यो — द्ये K

In Public domain. Digitization Muthulakshmi Research Academy

भस्मसंपादनन्ध्यानम्ममेव परमस्य च।
एतान्याहप्रसन्नानि साधनानि प्रियेण तु॥ ५१॥

एतत् सर्वम्मयाख्यातं ममविज्ञानसिद्धये।
एतद्धर्म्मेषु यश्श्रद्धां नित्यं कुर्याद्विजोत्तमः॥ ५२॥

अचिराल्लभते ज्ञानं संसारच्छेदकारणम्।
एषु धर्मेषु योधर्मो विलोपस्य च धर्मिणः॥ ५३॥

न तस्य ब्रह्मविज्ञानं जायते न हि संशयः।

अगस्त्यसंहितायाम्—

भवेत्त्रिषवणस्नायी भस्मोद्धूलितविग्रहः॥ ५४॥

प्रणवञ्च जपेन्नित्यं मोक्षशास्त्रस्य चिन्तनम्।
भस्मेनैवाग्निहोत्रस्य शिवाग्निजनितेन वा॥ ५५॥

त्रिपुण्ड्रधारी सततं ब्राह्मणस्सर्वकर्मसु।
आयुष्यवर्द्धनंह्येतत् त्रिविधस्यापि देहिनः॥ ५६॥

त्रिपुण्ड्रधारी सततं धारी रुद्राक्षकङ्कणः।
सर्वकर्म्माधिकारीस्यादन्यथा न शुचिर्भवेत्॥ ५७॥

ब्रह्माण्डपुराणे—

कार्तिकेय उवाच—

भगवन्देवदेवेश लोकनाथ जगत्पते।
पृच्छामि त्वामहं भक्त्या कथयस्व प्रयत्नतः॥ ५८॥

ईश्वरः—

पुण्यानां परमं पुण्यं पवित्रं पापनाशनम्।
रुद्राक्षधारणन्नित्यं इहलोके परत्र च॥ ५९॥

तत्रैव—

रुद्राक्षस्यफलं वत्स त्रिषुलोकेषु विश्रुतम्।

---

53 विलोपस्य च धर्मिणः] *conj.*; विलोयस्य धर्मिणः K (unmetrical) 54 जायते] *conj.*; ज्यायते K 54 °धूलित] *em.*; °धूलत K 57 धारी रुद्राक्ष] *conj.*; ⊔ रुद्राक्ष K 57 न शुचि°] *conj.*; स शुचि° K 58 भक्त्या] *conj.*; भ --- अ K

In Public domain. Digitization Muthulakshmi Research Academy

अक्षस्यदर्शनं पुण्यं स्पर्शनात् कोटिरुच्यते॥ ६०॥

शतकोटिगुणं पुण्यं धारणात्सततं नृणाम्।
लक्षकोटिसहस्राणि लक्षकोटि शतानि च॥ ६१॥

जपतो जुह्वतश्चैव रुद्राक्षस्य च धारणात्।

तत्रैवान्यत्र—

रुद्राक्षं कण्ठमावध्य श्वापि वा म्रियते यदि॥ ६२॥

सोऽपि रुद्रपदं याति किंपुनर्मानुषादयः।
शुचिर्वाप्यशुचिर्वापि अभक्षस्यापि भक्षणात्॥ ६३॥

गुरुदाररतो वापि ब्रह्महत्यादि संशयः।
म्लेच्छोवाप्यथ चण्डालः युक्तो वा सर्वपातकैः॥ ६४॥

यो रुद्राक्षधरोमर्त्यस्सरुद्रो नात्र संशयः।
रुद्राक्षमालिकां कर्णे धरयेत् भक्तिसंयुतः॥ ६५॥

पापकर्मोऽपि यो नित्यं रुद्रलोके महीयते।

॥ अथ पापनाशकत्वम्॥

पाद्मे—

रुद्राक्षं शिरसाह्येकं ⊔ रुद्रपरैस्सह॥ ६६॥

ध्वंसनं सर्वपापानां सर्वदुःखविमोचनं।
उच्छिष्टो वा विकर्मस्थो युक्तो वा सर्वपातकैः॥ ६७॥

मुच्यते सर्वपापेभ्यो रुद्राक्षस्य तु धारणात्।

तत्रैव—

खादन्मांसं पिबन्मद्यं सङ्गच्छन्नन्त्यजामपि॥ ६८॥

पातकेभ्यो विमुच्येत रुद्राक्षे शिरसि स्थिते।

तत्रैव—

रुद्राक्षमालिकां कण्ठे धारयेत् भक्तिवर्ज्जितः॥ ६९॥

पापकर्मापि यो नित्यं स मुक्तस्सर्वबन्धनात्।

---

62 रुद्राक्षं] *conj.*; रुद्राक्ष — K 67 युक्तो] *conj.*; योक्तो K

In Public domain. Digitization Muthulakshmi Research Academy

वासिष्ठलैंगे—

पश्यन्नपि निषिद्धांश्च तथा श्रुण्वन्नपि स्मरन्॥ ७०॥

जिघ्रन्नपि तथाचाश्नन् प्रलपन्नपि सन्ततम्।
कुर्वन्नपि तथा गच्छन्विसृजन्नपि मानवः॥ ७१॥

रुद्राक्षधारणादेव सर्वैः पापैः प्रमुच्यते।

तत्रैव—

कश्चित्पुरा मुने जात्या चण्डालोतीव दुर्ज्जनः॥ ७२॥

आसीत् ब्रहन् कृतं तेन ब्रह्महत्या सहस्रकम्।
गवां सहस्रन्निहतं ब्राह्मणानां धनं हृतम्॥ ७३॥

अन्यानियानिकर्माणि घोराण्याचरितानि च।
तथापि तस्य पापानि मुने रुद्राक्षधारणात्॥ ७४॥

दग्धानि शाल्मली तूला यथा दावाग्निसंस्थितम्।
कालेनमरणं प्राप्तस्सपुनर्यममागतः॥ ७५॥

सोपि तं प्राह भगवान् यमः सर्वार्थवित्तमः।
अहोपापं कृतं सर्वं त्वयालोके परन्तप॥ ७६॥

तत्फलं त्वां मयाबुद्धा शक्यं भो ईरितुन्नहि।
महात्मन् सकलन्दग्धं तव रुद्राक्षधारणात्॥ ७७॥

गच्छगच्छ विमानेन शिवलोकं सुखावहम्।
सोमसूर्यप्रतीकाशं विमानं सर्वगामिकम्॥ ७८॥

आरुह्य नृत्तगीताद्यैस्साकं शिवपुरं गतः।
तत्र दत्तं मयात्वस्य ब्रह्मन् रौद्रपदं मुदा॥ ७९॥

देवैश्च मुनिभिश्चान्यैः पूजितस्सर्वदाप्यसौ।
तस्मात्सर्वैस्सदा कार्यं रुद्राक्षाणाञ्च धारणम्॥ ८०॥

भोगमोक्षप्रदं पुण्यं मयाचैतद्धृतं मुदा।

---

73 कृतं तेन] *conj.*; कुतन्तेन K 76 यमः सर्वार्थवित्तमः] *conj.*; --- सर्वार्थश्चित्तमः K 77 ईरितुन्नहि] *conj.*; ---इतुन्नहि K 78 सोमसूर्य] *conj.*; सो --- सूर्य K 79 °त्वस्य] *conj.*; --- स्य K 80 देवैश्च] *conj.*; दैवैश्च K

In Public domain. Digitization Muthulakshmi Research Academy

अहोरुद्राक्षमाहात्म्यम्मयावक्तुन्न शक्यते॥ ८१॥

तस्मात्सर्वप्रयत्नेन कुरुरुद्राक्षधारणम्।

ब्रह्माण्डपुराणे—

हस्तेचोरसिकण्ठे वा मस्तकेवापि धारयेत्॥ ८२॥

मुच्यते सर्वपापेभ्यो नरो रुद्राक्ष धारणात्।

स्कन्दे—

हस्ते वा यदि वा कण्ठे मस्तके वाथ वक्षसि॥ ८३॥

मुच्यते सर्वपापेभ्यो नरो रुद्राक्षधारणात्।

॥ अथ ब्रह्मविष्णुशिवदेवनान्तर ऋष्यादि धार्यत्वम्॥

पराशरे—

महादेवश्चविष्णुश्च ब्रह्मा तेषां विभूतयः॥ ८४॥

देवाश्चान्ये सदा भक्त्या खलु रुद्राक्षधारिणः।
तेषां वंशप्रसूताश्च मुनयस्सकला अपि॥ ८५॥

श्रौतस्मार्त्तपराश्शुद्धाः खलु रुद्राक्षधारिणः।
पापिष्ठानां मनुष्याणां रुद्राक्षाणाञ्च धारणे॥ ८६॥

श्रद्धा न जायते यस्माद्वेदसिद्धे विमुक्तिदे।
वहूनां जन्मनामन्ते महादेवप्रसादतः॥ ८७॥

रुद्राक्षधारणे श्रद्धा स्वभावेनैव जायते।

इदं रुद्राक्षमाहात्म्यं पूर्वभस्मप्रकरणे भस्मन आश्रमधर्म्मत्वमोक्षार्थित्व-पापनाशकत्वशिवविष्ण्वादि सर्वधृतत्व निरूपणावसरे वहुधावृत्तम्॥

वासिष्ठलैंगे—

रुद्राक्षधारणादेव रुद्रो रुद्रत्वमागतः॥ ८८॥

मुनयस्सत्यसंकल्पा ब्रह्मा ब्रह्मत्वमागतः।

॥ अथ रुद्राक्ष ध्यातृधारिदानपूजाफलम्॥

स्कान्दे—

रुद्राक्षार्प्पितचेता यो रुद्राक्षं येन धारितम्॥ ८९॥

---

88 शिवविष्ण्वादि] *conj.*; शिवविष्ण्वा K

In Public domain. Digitization Muthulakshmi Research Academy

असौ माहेश्वरो लोके नमस्यस्स तु लिंगवत्।

तत्रैव —

धृतरुद्राक्षकण्ठाय यस्त्वन्नं संप्रयच्छति॥ १०॥

त्रिसप्तकुलमुद्धृत्य रुद्रलोकं स गच्छति।

वासिष्ठलैंगे —

अनेनभुक्तं रुद्रेण यत्भुक्तन्तत्तथा भवेत्॥ ११॥

पीतं रुद्रेण पीतं स्यात् घ्रातं घ्रातं शिवेन तत्।

तत्रैव —

रुद्राक्षधारिणे भक्त्या वस्त्रन्धान्यं ददाति यः॥ १२॥

सर्वपापविनिर्मुक्तश्शिवलोकं स गच्छति।
रुद्राक्षधारिणं श्राद्धे मोदयित्वा तु भोजयेत्॥ १३॥

पितृलोकमवाप्नोति नात्रकार्या विचारणा।
रुद्राक्षधारिणः पादौ प्रक्षाळ्यापः पिवेन्नरः॥ १४॥

सर्वपापविनिर्मुक्तश्शिवलोके महीयते।
सुराणामसुराणां च वन्दनीयो यथा शिवः॥ १५॥

रुद्राक्ष धारी सततं वन्दनीयस्तथा नरैः।
॥ अथ रुद्राक्षधारिनिन्दा दोषः॥
रुद्राक्षधारिणं दृष्ट्वा परिवादं करोति यः॥ १६॥

उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता।
रुद्राक्षधारणे शुद्धा येषान्नास्ति महामुने॥ १७॥

संकीर्णासंभवेत् व्रह्मन् तेषां वंशपरंपरा।
आलीनमकुलीनं वा भूतिरुद्राक्षधारिणम्॥ १८॥

दृष्ट्वोन्नतासने स्थित्वा रौरवन्नरकं व्रजेत्।
॥ अथ रुद्राक्षोत्पत्तिप्रकारः॥

स्कान्दे —

ईश्वरः —

श्रुणुषण्मुख तत्वेन कथयामि समासतः॥ १९॥

In Public domain. Digitization Muthulakshmi Research Academy

त्रिपुरोनाम दैत्यस्तु पुरासीत् सर्वदुर्जयः।
हतास्तेन सुरास्सर्वे ब्रह्मविष्ण्वग्निदेवताः॥। १००॥

तैस्सर्वैः कथिते तस्मिन् मदाहं त्रिपुरं प्रति।
अचिन्तयन्महाशस्त्रं सर्वशस्त्र मनोहरम्॥ १०१॥

सर्वदेवमयन्दिव्यं ज्वलन्तं घोररूपिणम्।
त्रिपुरस्य वधार्थाय देवानान्त्राणनाय च॥ १०२॥

सर्वविघ्नोपशमनमघोरास्त्रमचिन्तितम्।
दिव्यं वर्षसहस्रन्तु चक्षुरुन्मीलितं मया॥ १०३॥

पश्चान्ममाकुलाक्षिभ्यः पतिता जलबिन्दवः।
तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः॥ १०४॥

ममाज्ञया महासेन मर्त्यानां हितकाम्यया।
षण्मुखः—
कति भेदाः कतिमुखाः कावाधिष्ठातृदेवताः॥ १०५॥

गुणास्तु कीदृशास्तेषां कथयस्व यथार्थतः।
ईश्वरः—
श्रुणु षण्मुख तत्वेन तत्सर्वं कथयामि ते॥ १०६॥

बभूवुस्ते च रुद्राक्षाण्यष्टत्रिंशत् प्रभेदतः।
सूर्यनेत्रसमुत्भूताः कपिलाद्द्वादशस्मृताः॥ १०७॥

सोमनेत्रोत्थिता श्वेता ते षोडशविधाः क्रमात्।
वह्निनेत्रोत्भवाः कृष्णा दश भेदा भवन्ति ते॥ १०८॥

श्वेतवक्त्रन्तु रुद्राक्ष ज्ञातितोब्राह्ममुच्यते।
क्षात्रं रक्तं तथामिश्रं वैश्यं कृष्णन्तु शूद्रकम्॥ १०९॥

103–104. Cf. *Makuṭāgama* 2:121–22b:
दिव्यवर्ष सहस्रन्तु चक्षुरुल्मीतं मया ।
मुञ्चन्ति मम नेत्राणि विन्दवः पतितो भुवि ॥
विन्दवो गुरुवृक्षाश्च फलं रुत्राक्षमुच्यते ।

---

108 सोमनेत्रोत्थिता श्वेता] *conj.*; सोमनेत्रोर्थिताश्वेता K

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मकैवर्ते—

अनवद्यां प्रति ना--- शर्म्मा —

दैत्यः पुरासीत् त्रिपुरः प्रसिद्धो नाम्नाऽनवद्ये निखिलैरजय्यः।
हतास्सुरा ये न रथांगपाणिर्ज्जितोविरिञ्चः ककुभामयीशः॥ ११०॥

हतावशिष्टैरुदितोऽतिभीतैस्तुतास्सहस्रं शरदां प्रसन्नः।
अचिन्तयत्तं प्रतिहन्तुकामश्शस्त्रन्दुरापं सकलामरौघैः॥ १११॥

स्फुरत्स्फुलिंगं तपनप्रकाशं सर्वाऽशुभघ्नञ्जगतोऽवनाय।
उन्मील्यनेत्राणिशरत्सहस्रमघोरमस्त्रं रिपुनाशनार्थम्॥ ११२॥

तदाकुलन्तस्य वभूवचाक्ष्णान्त्रयन्ततोश्रूण्यपतं ⊔ तेभ्यः।
रुद्राक्षवृक्षाविटपैर्वभूवुश्शिवाज्ञयासर्वजगद्धिताय॥ ११३॥

रुद्राक्षवृक्षास्तपनाक्षिजातास्तेद्वादशस्युः कपिलाः प्रभेदैः।
चन्द्राक्षिजाष्षोडश शुभ्रवर्णाः कृष्णा दशास्युर्ज्वलनाक्षिजाताः॥ ११४॥

ब्राह्मं सितं कापिलवर्णयुक्तं क्षात्रन्तुवैश्यं ह्युभयात्मकं यत्।
कृष्णन्तु शूद्रं कथयन्ति वीजं रुद्राक्षवृक्षप्रभवन्तु जात्या॥ ११५॥

॥ अथ रुद्राक्षधारणप्रकारः॥

तत्रादौ वर्णाश्रमोचितानान्धार्याणांरुद्राक्षाणां गन्धतोयेन प्रक्षाळनं अनन्तरं पञ्चगव्येन अनन्तरं शुद्धतोयेन अनन्तरं श्रीरुद्रेणाभिषेचयेत्। इयमेव रुद्राक्षाणां प्रतिष्ठा वैदिकी।

जपमालिका रुद्राक्षाणाञ्च। यद्यपि पुराणेषु जपमालिका रुद्राक्षाणां प्रतिष्ठाविशेषो दृश्यते स तान्त्रिकाणामेव। अथवा वैदिकमते रुद्राक्षाणां प्रतिष्ठैव नास्ति। श्रुत्यादिष्वदर्शनात्। यथा स्वयंभुलिंगस्य प्रतिष्ठा न विधीयते तथा रुद्राक्षाणां स्वयंभुत्वात् न प्रतिष्ठा।

शिखायामेकं शिरसिषट् त्रिंशत् संख्याकं चत्वारिंशत् संख्याकं वा तदधिकं संख्याकं वा कर्णयोष्षट् षट्कण्ठे द्वात्रिंशत् उरसि पञ्चाशत् नाभिपर्यन्तं

अष्टोत्तरशतं अधिकं वा सहस्रपर्यन्तं वाहोष्षोडशषोडश मणिवन्धयोर्द्वादश द्वादश यज्ञोपवीते एकम्। एवं वर्णाश्रमोचितानां रुद्राक्षाणां यथोचितमन्त्रेण धारणं जपमालिकानान्तु अष्टोत्तरशतं शतं चतुःपञ्चाशत् पञ्चाशत्

---

113 जगद्धिताय] *conj.*; जद्धिताय K (unmetrical)

In Public domain. Digitization Muthulakshmi Research Academy

सप्तविंशतिर्वा पञ्चविंशतिर्वा। अत्र वचनानि प्रदृश्यन्ते।
वासिष्ठालैंगे—
वसिष्ठः—
रुद्राक्षधारणं देव कुत्र प्रोक्तं वृषध्वज।
केन मन्त्रेण देवेश कया भावनयेरितम्॥ ११६॥
केषां धार्यं महादेव किं फलं धारणस्य च।
ईश्वरः—
बद्ध्वास्वर्णेन रुद्राक्षं रजतेनाथवा मुने॥ ११७॥
शिखायान्धारयेन्नित्यं कर्णयोर्वा समाहितः।
यज्ञोपवीते हस्ते वा कण्ठे तुन्देऽथवा नरः॥ ११८॥
श्रीमत्पञ्चाक्षरेणैव प्रणवेनैव वाऽथवा।
आत्ममन्तेणमेधावी रुद्राक्षन्धारयेन्मुदा॥ ११९॥
रुद्राक्षधारणं साक्षाच्छिवज्ञानस्य लक्षणम्।
रुद्राक्षं यच्छिखायान्तत् परतत्वमिति स्मरेत्॥ १२०॥
कण्ठयोरुभयोर्ब्रह्मन् देवं देवीं च भावयेत्।
यज्ञोपवीते देवांश्च तथा हस्ते दिशस्मरेत्॥ १२१॥
कण्ठे सरस्वतीन्देवीं पावकञ्च विभावयेत्।
सर्वाश्रमाणां वर्णानां रुद्राक्षाणाञ्च धारणम्॥ १२२॥
कर्तव्यम्मन्त्रतः प्रोक्तं द्विजानां नान्यवर्णिनाम्।
स्कान्दे—
एकवक्त्रशिवस्साक्षात् ब्रह्महत्यां व्यपोहति॥ १२३॥

123c–23b. *Cf. Nirṇayasindhu quots as Śivarahasya,*
Cf. also Śivamahāpurāṇa, Vidyeśvarasaṃhitā 25:64–66:
एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति।
अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च॥
द्विवक्त्रो हरगौरी स्याद्गोवधाद्यघनाशकृत्।

---

120 परतत्वमिति] *conj.*; परतत्वमिनि K 121 °उभयोर्ब्रह्मन्] *conj.*; °उभयोब्रह्मन् K 123 द्विजानां नान्य°] *conj.*; द्विजानां तु नान्य K (unmetrical)

In Public domain. Digitization Muthulakshmi Research Academy

द्विवक्त्रो देवदेवस्यात् गोवधन्नाशयेद्ध्रुवं।
त्रिवक्त्रस्त्वनलस्साक्षात् स्त्रीहत्यान्दहति क्षणात्॥ १२४॥

चतुर्वक्त्रस्स्वयं ब्रह्मा नरहत्यां व्यपोहति।
पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः॥ १२५॥

अभक्ष्यभक्षणोद्भूतैरगम्यागमनोद्भवैः।
मुच्यते सर्वपापैस्तु पञ्चवक्त्रस्य धारणात्॥ १२६॥

षड्वक्त्रः कार्त्तिकेयस्तु तद्धार्यं दक्षिणे करे।
ब्रह्महत्यादिकैः पापैः मुच्यते नात्रसंशयः॥ १२७॥

सप्तवक्त्रो महानागोह्यनन्तो नाम नामतः।
तद्धारणात्तु मुच्येत स्वर्णस्तेयादि पातकैः॥ १२८॥

अष्टवक्त्रो महासेन साक्षादेव विनायकः।
मानकूटन्तुलाकूटं स्वर्णकूटं तथैव च॥ १२९॥

दुष्टचित्तस्त्रियं वाथ संस्पृशेद्वा गुरुस्त्रियम्।
एवमादीनि पापानि घ्नन्ति सर्वाणि धारणात्॥ १३०॥

विघ्नास्तस्य प्रशाम्यन्ति यान्ति चान्ते परं पदम्।
भवन्त्येते गुणास्सर्वेह्यष्टवक्त्रस्य धारणात्॥ १३१॥

124–25. Cf. *Śivamahāpurāṇa, Vidyeśvarasaṃhitā* 25:67–70:
त्रिवक्त्रो यो हि रुद्राक्षः साक्षात्साधनदस्सदा।
तत्प्रभावाद्भवेयुर्वै विद्याः सर्वाः प्रतिष्ठिताः॥
चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति।
दर्शनात्स्पर्शनात्सद्यश्चतुर्वर्गफलप्रदः॥
पंचवक्त्रः स्वयं रुद्रः कालाग्निर्नामतः प्रभुः।
सर्वमुक्तिप्रदश्चैव सर्वकामफलप्रदः॥
अगम्यागमनं पापमभक्ष्यस्य च भक्षणम्।
इत्यादिसर्वपापानि पंचवक्त्रो व्यपोहति॥

---

124 गोवधन्नाशये॰] *conj.*; गे --- धन्नाशये॰ K **125** ब्रह्मा] *conj.*; ब्रमा K **125** नरहत्यां] *conj.*; न --- ह --- आं K **125** कालाग्निर्नाम] *conj.*; कालाग्निन्नान K **127** तद्धार्यं] *conj.*; --- धार्यं K

In Public domain. Digitization Muthulakshmi Research Academy

नववक्त्रो भैरवस्तु धारयेद्वामबाहुके।
भुक्तिमुक्तिप्रदः प्रोक्तो ममतुल्यबलो भवेत्॥ १३२॥

भ्रूणहत्यासहस्राणि ब्रह्महत्या शतानि च।
तत्सर्वन्नश्यति क्षिप्रं नववक्त्रस्य धारणात्॥ १३३॥

दशवक्त्रस्तु देवेशस्साक्षाद्देवो जनार्द्दनः।
ग्रहाश्चैव पिशाचाश्च वेताळा ब्रह्मराक्षसाः॥ १३४॥

पन्नगाश्च प्रणश्यन्ति दशवक्त्रस्य धारणात्।
वक्त्रैकादशरुद्राक्षं रुद्रैकादशकं स्मृतम्॥ १३५॥

शिखायान्धारयेद्यो वै तस्य पुण्यफलं शृणु।
अश्वमेधसहस्रस्य वाजपेयशतस्य च॥ १३६॥

गवां शतसहस्रस्य सम्यक्दत्तस्य यत्फलम्।
तत्फलं समवाप्नोति वक्त्रैकादश धारणात्॥ १३७॥

रुद्राक्षन्द्वादशास्यञ्च कण्ठदेशे तु धारयेत्।
आदित्यास्तोषिता नित्यं द्वादशास्येष्ववस्थिताः॥ १३८॥

गोमेधैश्चाश्वमेधैश्च यत्फलन्तदवाप्नुयात्।
शृंगिणां शस्त्रिणाञ्चैव व्याघ्रादीनां भयन्नहि॥ १३९॥

नचैवाधिभयन्तस्य नचव्याधिः प्रवर्त्तते।
न च किञ्चिद्भयन्तस्य सुखीचैवेश्वरो भवेत्॥ १४०॥

हस्त्यश्वमृगमार्ज्जार सर्प्पमूषिकदर्द्दुरान्।
खरांश्च सृगलासांश्च हत्वा वहुविधानपि॥ १४१॥

मुच्यते नात्र सन्देहो वक्त्रद्वादशधारणात्।
वक्त्रत्रयोदशं वत्स रुद्राक्षं यदि लभ्यते॥ १४२॥

कार्त्तिकेयसमं ज्ञेयं सर्वकामार्थ सिद्धिदम्।
रसो रसायनं चैव पादुका चैव सिद्ध्यति॥ १४३॥

तस्यैव सर्वभोग्यानि नात्रकार्या विचारणा।

---

143 पादुका] *conj.*; — आ K

In Public domain. Digitization Muthulakshmi Research Academy

मातरं पितरं वापि भ्रातरं वापि हन्ति यः॥ १४४॥

मुच्यते सर्वपापेभ्यस्त्रयोदश मुखस्य तु।
त्रयोदशास्यो रुद्राक्षो लभ्येत यदि पुत्रक॥ १४५॥

धारयेत्सततं मूर्ध्नि तस्य पुण्यं शिवस्य तु।
किं पुनर्बहुनोक्तेन वर्णनेन पुनः पुनः॥ १४६॥

पूज्यते सततन्देवैः प्राप्यते च परां गतिम्।
रुद्राक्षमेकं शिरसि धार्यं भक्त्या द्विजोत्तमैः॥ १४७॥

षट् त्रिंशत्भिः शिरोमाला धारणीया मनीषिभिः।
द्वात्रिंशद्भिः कण्ठमाला पञ्चाशत्भिर्हृदि स्मृता। १४८॥

कलाक्षैर्वाहुवलयमर्क्काक्षैर्म्मणिवन्धनम्।
अष्टोत्तरशतेनापि पञ्चाशत्भिष्षडानन॥ १४९॥

अथवा सप्तविंशत्या कृत्वारुद्राक्षमालिकाम्।
धारणाद्वा जपाद्वापि ह्यनन्तफलमश्नुते॥ १५०॥

अष्टोत्तरशतैर्म्माला रुद्राक्षैर्धार्यते यदि।
क्षणेक्षणेश्वमेधस्य फलं प्राप्नोति षण्मुख।
त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते॥ १५१॥

वायवीये—

विप्रादीनांक्रमाच्छ्वेतं रक्तं पीतं तथाऽसितम्।
तथालाभे यथा लाभं धारणीयमदूषितम्॥ १५२॥

तत्रापि नोत्तरं नीचैर्धार्यन्नीचमथोत्तरैः।
अधारणे धारणे च नरकाभीष्टदत्वतः॥ १५३॥

ब्रह्मकैवर्त्ते—

एकाननं शङ्कर एव साक्षाद्रुद्राक्षबीजं विनिहन्ति हत्याम्।

154–61. Cf. *Ṣaṭsāhasrika* quoted in *Sakalāgamasārasaṃgraha* IFP T 0351 p. 139–140: एकाननं शङ्कर एव साक्षात् ··· नास्मात् परं विद्यते।

---

147 शिरसि] *conj.*; शरसि K

In Public domain. Digitization Muthulakshmi Research Academy

द्विवक्त्रबीजं बहुगोवधघ्नं देवेशदैवत्यमलभ्यमक्ष्णाम्॥ १५४॥

अग्नेयमुक्तं वदनत्रयं यत् योषिद्वदघ्नं दधतां क्षणेन।
चतुर्म्मुखं यच्चतुराननीयं नरस्य हत्यां क्षणतो निहन्ति॥ १५५॥

कालाग्निरुद्रं खलु पञ्चवक्त्रं अभक्ष्यदुस्सङ्गमपातकघ्नम्।
स्कान्दं हि यत् षड्वदनं करेण दक्षेण धार्यं द्विजहन्तृ शुद्ध्यै॥ १५६॥

सप्ताननं भोगिपतिह्यनन्तस्तेयादिशुद्धिं विदधाति सद्यः।
वैनायकं ह्यष्टमुखं स्वर्णकूटं गुरुस्त्रीगमनाद्यघघ्नम्॥ १५७॥

नवाननं भैरवदैवतञ्च भुक्तिञ्च मुक्तिं शिवतुल्य शक्तिम्।
करोति वामेनकरेण धार्यं भक्त्यायुतानामपि हन्ति कोटिम्॥ १५८॥

हरिस्स्वयं यत् दशवक्त्रबीजं पिशाचभूतग्रहराक्षसां च।
वेतालसर्प्पप्रतियोगि सिंह व्याघ्रादिकानस्यनिहन्ति शीघ्रम्॥ १५९॥

एकादशास्यं शुभदं हि रौद्रं धार्यं शिखायां विधिनाऽनवद्ये।
नराश्वमेधायुत वाजपेय सहस्र गोदानसहस्र तुल्यम्॥ १६०॥

यद्वक्त्राणि दशद्वयेन कथितं तत् भास्करीयं स्मृतम्
कण्ठस्थं रवि तुष्टिकृद्धयमखैर्गोमेधपुण्यैस्समम्।
हस्त्यश्वश्वसृगालमूषिकखरक्लीवान्धनारीमृग-
व्यालोक्षाशुकभेकसर्प्पमहिषव्याघात दोषापहम्॥ १६१॥

यद्वक्त्राणि दशत्रयञ्च लभते तत् कार्त्तिकेयस्वयम्
सर्वं सिद्ध्यति भोगभोग्यमखिलं सिद्धेस्ततः पादुका।
इष्टार्थश्च रसो रसायनमथ भ्रूणार्यमातापितृ-
भ्रातृस्त्रीवधतो विशुध्यति दधन् नास्मात्परं विद्यते॥ १६२॥

रुद्राक्षमेकं शिरसाविधार्यं षट्त्रिंशमाला विदधीत मूर्ध्नि।
द्वात्रिंशकैः कण्ठपदेऽवधार्या शतार्ध क्लृप्ता हृदयेन धार्या॥ १६३॥

कलाक्षमाला भुजयोरुनाभेर्धार्याक्षमालामणिबन्धसीम्नि।

---

158 भक्त्या॰] *conj.*; हत्या॰ K 158 कोटिम्] *conj.*; — टिम् K 159 हरिस्स्वयं यत् दशवक्त्रबीजं] *conj.*; हरिस्स्वयद्दशवक्त्रबीजं K 160 ॰नवद्ये] *conj.*; ॰नवन्द्ये K 164 भुजयोरुनाभे] *conj.*; भजयोरिनाक्षै॰ K 164 सीम्नि] *conj.*; सिम्नि K

In Public domain. Digitization Muthulakshmi Research Academy

अष्टोत्तरैर्वा शतकैश्च मालातदर्ध क्लृप्तापि तदर्ध माला।
कण्ठेधृता येन तथाक्षमाला जस्वाप्नुयाद्यज्ञसहस्रपुण्यम्॥ १६४॥

ब्रह्माण्डपुराणे—

ईश्वर उवाच—

श्रृणुषण्मुख यत्नेन वक्त्रं वक्त्रं यथा फलम्।
एकवक्त्रश्शिवस्साक्षात् ब्रह्महत्या व्यपोहति॥ १६५॥

द्विवक्त्रन्देवदेवेशो गोवधन्नाशयेद्ध्रुवम्।
त्रिवक्त्रमनलस्साक्षात् स्त्रीहत्यानाशयेद्ध्रुवम्॥ १६६॥

चतुर्वक्त्रस्वयं ब्रहा ब्रह्महत्यां व्यपोहति।
पञ्चवक्त्र स्वयं रुद्रः कालाग्निन्नामनामतः॥ १६७॥

अगम्यागमनाच्चैव ह्यभक्षस्य च भक्षणात्।
मुच्यते सर्वपापेभ्यो पञ्चवक्त्रस्य धारणात्॥ १६८॥

षड्वक्त्रं कार्त्तिकेयस्तु धारयेद्दक्षिणे करे।
ब्रह्महत्यादिभिः पापैर्म्मुच्यते नात्र संशयः॥ १६९॥

सप्तवक्त्रम्महानाग अनन्तो नाम नामतः।
स्वर्णस्तेयादि गोहत्या पञ्चकैर्म्मुच्यते नरः॥ १७०॥

अष्टवक्त्रम्महापुण्यं देवस्साक्षाद्विनायकः।
मानकूटन्तुलाकूटं स्वर्णकूटन्तथैव च॥ १७१॥

एवमादीनिपापानि हन्ति सर्वाणि वै धृवम्।
नवास्यं भैरवस्साक्षात् धारयेद्वाम बाहुके॥ १७२॥

अपि कोटिदानस्य फलं भवति षण्मुख।
लक्षकोटि सहस्राणि पातकानि करोति यः॥ १७३॥

तत्सर्वन्नाशयेत् क्षिप्रं नववक्त्रस्य धारणात्।
दशवक्त्रन्तु हे वत्स साक्षाद्देवो जनार्द्दनः॥ १७४॥

---

164 माला] *conj.*; --- ला K 165 यत्नेन] *conj.*; यत्तेन K 172 हन्ति] *conj.*; हन्ते K 173 अपि] *conj.*; कपि K 174 नववक्त्रस्य] *conj.*; नाववक्त्रस्य K 174 °वक्त्रन्तु हे वत्स] *conj.*; वक्त्र --- वत्स K

In Public domain. Digitization Muthulakshmi Research Academy

ग्रहाश्च भूतवेताळाः पिशाचा ब्रह्मराक्षसाः।
पन्नगाश्चापि नश्यन्ति दशवक्त्रस्य धारणात्॥ १७५ ॥

एकादशास्यं रुद्राक्षं रुद्रैकादशक स्मृतः।
शिखायान्धारयेन्नित्यं तस्य पुण्यफलं श्रुणु॥ १७६ ॥

अश्वमेध सहस्राणि वाजपेय शतानि च।
गवां शतसहस्रस्य सम्यक् दत्तस्य यत्फलं॥ १७७ ॥

तत्सर्वं समवाप्नोति वक्त्रैकादश धारणात्।
रुद्राक्षन्द्वादशंवक्त्रं कण्ठ एव तु धारयेत्॥ १७८ ॥

आदित्यास्तेन तुष्यन्ति द्वादशात्म व्यवस्थिताः।
वक्त्रत्रयोदशं वत्स रुद्राक्षं यदि धारयेत्॥ १७९ ॥

कामदं सिद्धिदं ज्ञेयं सर्वपापनिवर्हणम्।
मातापिता तथावन्धुर्भ्राताचैव निरस्यते॥ १८० ॥

मुच्यते सर्वपापैस्तु वक्त्रन्दृष्ट्वा त्रयोदश।
वक्त्रन्त्रयोदशं वत्स रुद्राक्षं यदि लभ्यते॥ १८१ ॥

धारयेत्सततं मूर्ध्नि शक्तिबिन्दुं शिवस्य तु।
गुणस्तस्य च माहात्म्यं कथितुन्नैव शक्यते॥ १८२ ॥

अथ जपविषयानिवचनानि स्कान्दे—

लक्षणञ्जपमालाया श्रुणु वक्ष्यामि षण्मुख।
रुद्राक्षस्य मुखं ब्रह्मा विन्दुरुद्र इतीरितम्॥ १८३ ॥

विष्णुः पुच्छं भवेच्छैवे भोगमोक्षफलप्रदा।
पञ्चविंशति रुद्राक्षैः पञ्चवक्त्रैस्सकण्टकैः॥ १८४ ॥

रक्तवर्णैरसम्मिश्रैः ⊔ कृतविदर्भितैः।

---

178 तत्सर्वं समवाप्नोति] *conj.*; तत् ⊔ समवाप्नोति K (unmetrical) 178 धारणात्] *conj.*; धार — K 180 निरस्यते] *conj.*; नि ⊔ स्यते K 181 त्रयोदश] *conj.*; त्र-योदशः K 182 माहात्म्यं] *conj.*; महात्म्यं K 183 इतीरितम्] *conj.*; इ — रितम् K 184 °च्छैवे] *conj.*; च्छै ⊔ K 184 °विंशति रुद्राक्षैः] *conj.*; °विंशतिश्चाक्षैः K (unmetrical)

In Public domain. Digitization Muthulakshmi Research Academy

अक्षसूत्रं प्रकर्त्तव्यं गोपुच्छवलयाकृति॥ १८५॥

वक्त्रं वक्त्रेण संयोज्य पुच्छं पुच्छेन योजयेत्।
मेरुरूर्ध्वमुखं कुर्यात् तदूर्ध्वन्नावकाशकम्॥ १८६॥

अंगुष्ठदेशिनीभ्यां तु मध्यमायां व्यवस्थितम्।
प्रक्षाळ्य गन्धतोयेन पञ्चगव्येन चोपरि॥ १८७॥

ततश्शिवांभसा क्षाळ्य ततो मन्त्रगणान्यसेत्।
स्पृष्ट्वा शिवास्त्रमन्त्रेण कवचेनावकुण्ठयेत्॥ १८८॥

मूलमन्त्रं न्यसेत्पश्चात् पूजयेत् पूर्ववत्तथा।
त्रिवृक् सूत्रेण ⊔ यावदष्टोत्तरं शतम्॥ १८९॥

मूलमन्त्रं समुच्चार्य शुद्धभूमौ निधाय च।
तस्योपरि न्यसेत्सांगं शिवं परमकारणम्॥ १९०॥

प्रतिष्ठिता भवेन्माला सर्वकर्म्मफलप्रदा।
यस्यमन्त्रस्य यो मन्त्रस्तत्तेनैवाभिपूजयेत्॥ १९१॥

मूर्ध्निकण्ठेऽथवाकर्णे न्यसेद्वा जपमालिकाम्।
रुद्राक्षमालाचैवं हि जप्तव्यानि यतात्मना॥ १९२॥

पाद्मे—

अक्षमालाविधिं वक्ष्ये श्रुणुष्वावहितो नृप।
साम्राज्यं स्फाटिको दद्यात् पुत्रजीवी परां श्रियम्॥ १९३॥

आत्मकुशग्रन्धि रुद्राक्षस्सर्वकामदः।
प्रवाळश्च कृतामाला सर्वलोकवशंकरी॥ १९४॥

---

185. Cf. *Kriyākramadyotikā* commentary of Kacchapeśvaraśivācārya, IFP T 0109 p. 215: अक्षमालां प्रकुर्वीत गोपुच्छवलयाकृतिम् ।

186. Cf. *Kriyākramadyotikā* commentary of Kacchapeśvaraśivācārya, IFP T 0109 p. 215: मुखे मुखं प्रयुंजीत पृष्टे पृष्टे नियोजयेत् । मेरुरूर्ध्वमुखाकार्या

---

187 गन्धतोयेन] *em.*; ते ⊔ न K **192** न्यसेद्वा] *conj.*; --- सेद्वा K **193** अक्षमालाविधिं] *conj.*; अ --- लाविधिं K

In Public domain. Digitization Muthulakshmi Research Academy

भोगमोक्षप्रदा माला स्यादामलक्याः फलैः कृता।
मुक्ताफलैः कृतामाला सर्वविद्याप्रदायिनी॥ १९५॥

माणिक्यरचितामाला त्रैलोक्यस्त्री वशीकरी।
नीलैर्मरकतैर्वापि कृता शत्रुजयप्रदा॥ १९६॥

सुवर्णरचितामाला दद्याद्वै महतीं श्रियम्।
तथा रूप्यमयीमाला कन्यां यच्छति कामिनाम्॥ १९७॥

उक्तानां सर्वकामानां दायिनी हरदैः कृता॥
अष्टोत्तरशता माला तत्रस्यादुत्तमोत्तमा॥ १९८॥

शतसंख्योत्तमामाला पञ्चाशन्मध्यमा मता।
चतुः पञ्चाशता यद्वा कुर्याद्वा सप्तविंशतिः॥ १९९॥

अथवा पञ्चविंशत्या यदि स्याच्छतनिर्म्मिता।
पञ्चाशदक्षराण्यत्रानुलोम प्रतिलोमतः॥ २००॥

इत्येवं स्थापयेत् गूढन्नाकस्मैचित् प्रदापयेत्।
वर्ण विन्यस्तया येन क्रियते मालया जपः।
एकवारेण तस्यैव पुनश्चर्या कृता भवेत्॥ २०१॥

स्कान्दे—

कुर्यादष्टोत्तरशतैस्तदर्धैर्वा विधानतः।
सप्तविंशतिकैर्वापि शुभां रुद्राक्षमालिकाम्॥ २०२॥

मोक्षार्थी पञ्चविंशत्या पुष्ट्यर्थी त्रिंशता जपेत्।
पञ्चाशत्भिस्सहैकेन पञ्चादश्याभिचारके॥ २०३॥

अंगुष्ठं मोक्षदं ज्ञेयं तर्जनी शत्रुनाशनी।

---

204. Cf. *Śivamahāpurāṇa, Vāyavīyasaṃhitā* 14:39:
अंगुष्ठं मोक्षदं विद्यात्तर्ज्जनीं शत्रुनाशिनीम् ॥
मध्यमां धनदां शान्तिं करोत्येषा ह्यनामिका ॥

---

195 भोगमोक्ष°] *conj.*; ⊔ मोक्ष° K 196 °मरकतै°] *conj.*; °मरतकै° K 198 °शता माला] *conj.*; °शता — K 199 कुर्याद्वा] *conj.*; कु — K 200 °ण्यत्रानुलोम] *conj.*; °ण्यत्र — लोम K

In Public domain. Digitization Muthulakshmi Research Academy

अनामिका शुभा ज्ञेया मध्यमाधनकारिणी॥ २०४॥

कनिष्ठा मरणे शस्ता सर्वत्रांगुष्ठयुक् भवेत्।
अंगुल्या जपसंख्यायां एकमेकफलं भवेत्॥ २०५॥

शंखैर्द्दशगुणं प्रोक्तं स्फाटिकैस्तु सहस्रकम्।
मौक्तिकैर्ल्लक्षमित्याहुः पद्मकैः कोटिरुच्यते॥ २०६॥

स्वर्णकैर्द्दशकोटिस्तु कुशैः कोटिसहस्रकम्।
रुद्राक्षैर्ज्जपतः पुत्र संख्या नैव च विद्यते॥ २०७॥

उत्तमम्मानसं प्रोक्तं उपांशुह्यत्र मध्यमम्।
उच्चैस्यादधमं ज्ञेयं जपस्तेष्वर्चनादिषु॥ २०८॥

पराशरे—

अंगुल्या शंखमणिना पुत्रञ्जीवेन वा वुधः।
पद्माक्षैः स्फाटिकैर्वापि कुशग्रन्थ्याथवा जपेत्॥ २०९॥

रुद्राक्षेणैव वा नित्यं जपेन्मन्त्रमतन्द्रितः।
रुद्राक्षेण जपेन्मर्त्यस्साक्षाद्रुद्रसमो भवेत्॥ २१०॥

रुद्राक्षस्य तु माहात्म्यं जावालेनादरेण तु।
पठ्यते मुनिभिस्सर्वैः शिवेनापि महात्मना॥ २११॥

---

206. Cf. *Śivamahāpurāṇa, Vāyavīyasaṃhitā* 14:35–36:
शतं स्याच्छंखमणिभिः प्रवालैस्तु सहस्रकम् ॥
स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशलक्षन्तु सौवर्णैः कोटिरुच्यते ॥
कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ॥

208. Cf. *Śivamahāpurāṇa, Vāyavīyasaṃhitā* 14:24:
उत्तमं मानसं जाप्यमुपांशुं चैवमध्यमम् ॥
अधमं वाचिकं प्राहुरागमार्थविशारदाः ॥

---

207 विद्यते] *conj.*; --- ते K 208 जपस्तेष्वर्चनादिषु] *conj.*; जपस्ते --- नादिषु K 209 कुशग्रन्थ्या॰] *conj.*; कु --- ग्रन्थ्या K 210 ॰मन्त्रमतन्द्रितः] *conj.*; ॰मन्त्रमत --- तः K 211 जावालेनादरेण] *conj.*; जावाले --- नादरेण K

In Public domain. Digitization Muthulakshmi Research Academy

अंगुल्या जप एकस्याद्रेखयाष्टगुणं भवेत्।
जपस्तु शंखमणिना जपमष्टोत्तरं भवेत्॥ २१२॥

जपस्तु पुत्रञ्जीवेन भवेदेव शतत्रयम्।
पद्माक्षेण सहस्रं स्यात् स्फाटिकेनायुतत्रयम्॥ २१३॥

कोटिकोटि कुशग्रन्थ्या रुद्राक्षेणान्त वर्ज्जितः।
अतस्सर्वप्रयत्नेन रुद्राक्षैस्सर्वदा जपेत्॥ २१४॥

अथ रुद्राक्षोत्पत्या विषये सर्वा बृहज्जाबाल श्रुतिः —

अथहैनं भगवन्तं कालाग्निरुद्रं भुसुण्डुः पप्रच्छ - कथं रुद्राक्षोत्पत्तिः? तद्धारणात् किं फलम्? इति। तं होवाच भगवान् कालाग्निरुद्रः। त्रिपुरवधाय पुनरोन्मीलिताक्षोभं तेभ्यो जलविन्दवो भूमौ पतितास्तेन पतितास्ते रुद्राक्षा जातास्सर्वानुग्रहार्थाय तेषां नामोच्चारणेन दशगोदानफलम्। दर्शनस्पर्शनाभ्यान्द्विगुणं त्रिगुणफलं वदन्ति। अत ऊर्द्ध्वं वक्तुन्नशक्नोमि तत्र श्लोकाः—

कस्माज्जातस्तु किन्नाम कथं वा धार्यते नरैः।
कतिभेदैर्म्मुखान्यत्र कैर्मन्त्रैः कथयस्व मे। २१५॥

दिव्यवर्षसहस्राणि चक्षुरुन्मीलितम्मया।
पुटाभ्यां चलनाक्षिभ्यां पतिताजलविन्दवः॥ २१६॥

तत्राश्रुविन्दवो जाता महारुद्राक्ष वृक्षकाः।
स्थावरत्वमनुप्राप्य भक्तानुग्रहकारिणाम्॥ २१७॥

भक्त्या रात्रौ दिवा पापं दिवारात्रि कृतं हरेत्।
लक्षं तु दर्शनं पुण्यं कोटिस्तत्स्पर्शनात् भवेत्॥ २१८॥

तत्तत् कोटिशतं पुण्यं लभते धारणान्नरः।
लक्षकोटिसहस्राणि लक्षकोटि शतानि च॥ २१९॥

---

212. Cf. *Śivamahāpurāṇa*, *Vāyavīyasaṃhitā* 14:34:
अङ्गुल्या जपसंख्यानमेकमेवमुदाहृतम् ॥
रेखयाष्टगुणं विद्यात्पुत्रजीवैर्दशाधिकम् ॥

---

212 °रेखयाष्टगुणं] *conj.*; °रेखया — गुणं K

In Public domain. Digitization Muthulakshmi Research Academy

तज्जपाल्लभते पुण्यं नरो रुद्राक्षधारणात्।
धात्रीफलप्रमाणं यत् श्रेष्ठमेतदुदाहृतम्॥ २२०॥

बदरीफलमानन्तु मध्यमं प्रोच्यते बुधैः।
अधमं चणमात्रं स्यात् प्रक्रियैषा मयोच्यते॥ २२१॥

ब्राह्मणाक्षत्रिया वैश्या शूद्राश्चेति शिवाज्ञया।
वृक्षा जाता पृथिव्यां तु तज्जातीयाश्शुभाक्षकाः॥ २२२॥

श्वेता ब्राह्मणा ज्ञेया क्षत्रिया रक्तवर्णकाः।
पीता वैश्यास्तु विज्ञेया कृष्णाश्शूद्रा उदाहृताः॥ २२३॥

ब्राह्मणो बिभृयाच्छ्वेतान्रक्तान्राजा तु धारयेत्।
पीतान्वैश्यस्तु बिभृयात् कृष्णाञ्छूद्रस्तु धारयेत्॥ २२४॥

समास्निग्धादृढास्थूला कण्टकैस्संयुताश्शुभाः।
कृमिदष्टं छिन्नभिन्नं कण्टकैर्हीनमेव च॥ २२५॥

व्रणयुक्तमवृक्तं च षड्रुद्राक्षाणि वर्ज्जयेत्।
स्वयमेव तुतद्वारं रुद्राक्षं स्यादिहोत्तमम्॥ २२६॥

यत्तु पौरुषयत्नेन कृतन्तन्मध्यमं भवेत्।
समान् स्निग्धान् दृढन्पक्वान् क्षौमसूत्रेण संयुतान्॥ २२७॥

धारयेत्सर्वगात्रेषु समास्यानि विचक्षणः।
निघर्षे हेमरेखेव यस्य रेखा प्रदृश्यते॥ २२८॥

तदक्षमुत्तमं विद्यात् तद्धार्यं शिवपूजकैः।
शिखायामेकरुद्राक्षं त्रिशतं शिरसा वहेत्॥ २२९॥

द्वात्रिंशतं गळे दध्यात् बाहोर्द्वादश धारयेत्।
मणिबन्धे च तावन्ति स्कन्धे पञ्चाशतं वहेत्॥ २३०॥

अष्टोत्तरशतम्मालामुपवीते प्रकल्पयेत्।

---

220 श्रेष्ठमेत॰] *conj.*; श्रे --- मेत॰ K 225 भिन्नं] *conj.*; --- न्न K 226 ॰वृक्तं च] *conj.*; ॰वृक्तं K (unmetrical) 226 तद्वारं] *conj.*; --- द्वारं K 227 कृतन्तन्मध्यमं] *conj.*; कृतन्तध्यमं K (unmetrical) 227 दृधान्पक्वान्] *conj.*; दृ --- पक्वान् K 228 विचक्षणः] *conj.*; विचक्षण --- K 229 ॰पूजकैः] *conj.*; पू --- कैः K

In Public domain. Digitization Muthulakshmi Research Academy

द्विसरन्त्रिसरं वापि सराणां पञ्चकन्तु वा॥ २३१॥

सराणां सप्तकं वापि बिभृयात्कण्ठदेशतः।
मकुटे कुण्डलेचैव कर्णिकाहारकेषु च॥ २३२॥

केयूरमकुटेचैव कुक्षिबन्धे विशेषतः।
उपवीतं सदाकालं रुद्राक्षन्धारयेन्नरः॥ २३३॥

त्रिशतन्त्वधमं पञ्चशतम्मध्यममुच्यते।
सहस्रमुत्तमं विद्यादेवं भेदे न धारयेत्॥ २३४॥

शिरसीशानमन्त्रेण कण्ठे तत्पुरुषेण च।
अघोरेण गळे धार्यन्तेनैव हृदयेपि च॥ २३५॥

अघोरबीजमन्त्रेण करयोर्धारयेत् सुधीः।
पञ्चाशदक्षग्रथितान् स्थाप्य यद्व्योमचोदरे॥ २३६॥

पञ्चब्रह्मभिरग्नेश्च त्रिमालाः पञ्चसप्त च।
अथवा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत्॥ २३७॥

अथ कालाग्निरुद्रं भुसुण्डुः पप्रच्छ। रुद्राक्षाणाम्मुखभेदेन यदक्षं यत् स्वरूपं यत्फलमिति तत्स्वरूपं मुखयुक्तमरिष्टनिरसनक्षमं ब्रूहीति। सहोवाच—

तत्रैते श्लोकाः—

एकवक्त्रन्तु रुद्राक्षं परतत्वस्वरूपकम्।
तद्धारणात् परे तत्वे लीयते विजितेन्द्रियः॥ २३८॥

द्विवक्त्रन्तु मुनिश्रेष्ठ अर्धनारीश्वरोभवेत्।
धारणादर्धनारीश प्रीयते तस्य नित्यशः॥ २३९॥

त्रिवक्त्रमनलस्साक्षात् स्त्रीहत्यान्दहति क्षणात्।
त्रिमुखश्चैव रुद्राक्षमग्नित्रयमितीरितम्॥ २४०॥

---

232 कण्ठदेशतः] *conj.*; दण्ठ — शतः K 234 मध्यममुच्यते] *conj.*; मध्यम — ते K 236 यद्व्योम] *conj.*; यद्य ⊔ K 237 मुखयुक्तमरिष्टनिरसनक्षमं] *conj.*; — खयुक्तमरिष्ट — K 239 अर्धनारीश्वरोभवेत्] *conj.*; अर्धन — रोभवेत् K 240 स्त्रीहत्यान्दहति] *conj.*; — न्दहति K

In Public domain. Digitization Muthulakshmi Research Academy

तद्धारणाच्च हुतभुक् तस्य तुष्यति नित्यशः।
चतुर्मुखं तु रुद्राक्षं पितामहस्वरूपकं॥ २४१॥

तस्य धारणमात्रेण सन्तुष्यति पितामहः।
पञ्चवक्त्रन्तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम्॥ २४२॥

तस्यधारणमात्रेण सन्तुष्यति सदाशिवः।
पञ्चवक्त्रस्वयं रुद्रः कालाग्निर्न्नामनामतः॥ २४३॥

अगम्यागमनाच्चैवह्यभक्ष्यस्य च भक्षणात्।
मुच्यते सर्वपापेभ्यः पञ्चवक्त्रस्य धारणात्॥ २४४॥

षड्वक्त्रमपि रुद्राक्षं कार्त्तिकेयाधिदैवतं।
तद्धारणम्महाश्रेयो महदारोग्यमेव च॥ २४५॥

मतिविज्ञानसंपत्तिश्शुद्धये धारयेत्सुधीः।
विनायकाधिदैवञ्च प्रवदन्ति मनीषिणः॥ २४६॥

सप्तवक्त्रन्तु रुद्राक्षं सप्तमात्राधिदैवतम्।
सप्ताश्वदैवतञ्चैव मुनिसप्तकदैवतम्॥ २४७॥

तद्रुद्राक्षान्महाश्रीस्यान्महदारोग्यमाप्नुयात्।
महाविज्ञानसंपत्तिश्शुद्धिर्धारयतश्शुभा॥ २४८॥

अष्टवक्त्रन्तु रुद्राक्षमष्टमूर्त्यधिदैवतम्।
अत्यष्टकप्रियञ्चैव गंगाप्रीतिकरं परम्॥ २४९॥

तद्धारणादिमेप्रीता भवेयुस्सत्यवादिनः।
नववक्त्रन्तु रुद्राक्षं नवशक्त्यधिदैवतम्॥ २५०॥

तस्यधारणमात्रेण प्रीणन्ति नवशक्तयः।
दशवक्त्रन्तु रुद्राक्षं धर्म्मदैवमुदाहृतम्॥ २५१॥

दशाशाप्रीतिजननं धारणेनात्रसंशयः।
एकादशमुखन्त्वक्षं रुद्रैकादशदैवतम्॥ २५२॥

---

241 तद्धारणाच्च] *conj.*; तद्धारणाद् K 241 तुष्यति] *conj.*; तुष् --- ति K 244 मुच्यते] *conj.*; --- च्यते K 249 अत्यष्टक॰] *conj.*; --- ष्टक॰ K 252 एकादशमुखन्त्वक्सं] *conj.*; एकादशमु --- क्षं K

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रदैवतमप्याहुस्सदासौभाग्यवर्धनम्।
रुद्राक्षन्द्वादशमुखं महाविष्णुस्वरूपकम्॥ २५३॥

द्वादशादित्यदैवञ्च विभ्रत्सत्यपरो नरः।
त्रयोदशमुखञ्चाक्षं कामदं मोक्षदं शुभम्॥ २५४॥

तस्य धारणमात्रेण कामदेवः प्रसीदति।
त्रयोदशमुखञ्चाक्षं रुद्रनेत्रसमुत्भवम्॥ २५५॥

सर्वव्याधिहरञ्चैव सर्वदाऽऽरोग्यमाप्नुयात्।
मद्यं मांसञ्च लशुनं पलण्डुं शिग्रुमेव च॥ २५६॥

श्लेष्मातकं विड्वराहस्भक्ष्यड़यं वर्जयेत् ततः।
ग्रहणेविषुवेचैव अयनेसंक्रमे तथा॥ २५७॥

दर्शे च पूर्णमासे च पूर्णेषु दिवसेष्वपि।
रुद्राक्षधारणात्सद्यस्सर्वपाप क्षयोभवेत्॥ २५८॥

॥ अस्यामेवोपनिषदि अविमुक्तांकितपाठभेदः॥

अथहैनं कालाग्निरुद्रं भुसुण्डुः पप्रच्छ — कथं रुद्राक्षोत्पत्तिः? तद्धारणात् किं फलम्? इति। तंहोवाचभगवान्कालाग्निरुद्रः — त्रिपुरवधार्थायोन्मीलिताक्षोहन्तेभ्यो जलबिन्दवो भूमौपतिताः ते रुद्राक्षाजाताः। सर्वानुग्रहार्थाय तेषान्नामोच्चारणमात्रेण दशगोदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं त्रिगुणं फलं वदन्ति। अत ऊर्ध्वं वक्तुन्नशक्नोमि।

तत्रैतेश्लोकाः —

कस्माज्जातन्तु किन्नाम कथं वा धार्यते नरैः।
कतिभेदमुकान्यत्र कैर्म्मन्त्रैर्धार्यते कथम्॥ २५९॥

दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया।
भूमावक्षिपुटाभ्यान्तु पतिताजलविन्दवः॥ २६०॥

तत्राश्रुविन्दवोजाता महारुद्राक्षवृक्षकाः।

---

253 महाविष्णु] *conj.*; --- K 254 मोक्षदं] *conj.*; --- दं K 256 पलाण्डुं शिग्रुमेव च] *conj.*; पलाण्डु श --- K 257 विड्वराहस्भक्ष्यं वर्जयेत् ततः] *conj.*; विवढ्वारं भक्षयन्वर्त्तते K 258 दिवसेष्वपि] *conj.*; दिवसेषु K (unmetrical) 258 क्षयोभवेत्] *conj.*; — योभवेत् K 258 ॰स्पर्शनाभ्यां] *conj.*; ॰स्पर्शना --- K

In Public domain. Digitization Muthulakshmi Research Academy

स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात्॥ २६१॥

भक्त्या रात्रौदिवंपापन्दिवारात्रिकृतं हरेत्।
लक्षन्तु दर्शनात्पुण्यं कोटिस्तत्स्पर्शनाद्भवेत्॥ २६२॥

तस्य कोटिशतं पुण्यं लभन्ते धारणान्नरः।
लक्षकोटिसहस्राणि लक्षकोटि शतानि च॥ २६३॥

तज्जपाल्लभते पुण्यन्नरो रुद्राक्षधारणात्।
रुद्राक्षाणान्तु रुद्राणां धारणात् स्यान्महत्फलम्॥ २६४॥

धात्रीफलप्रमाणं यत् श्रेष्ठमेतदुदाहृतम्।
वदरीफलमात्रन्तु मध्यमं प्रोच्यते वुधैः॥ २६५॥

अधमञ्चणमात्रं स्यात् प्रक्रियैषा मयोच्यते।
व्राह्मणाक्षत्रियावैश्याश्शूद्राश्चेति शिवाज्ञया॥ २६६॥

वृक्षा जाता पृथिव्यान्तु तज्जातीयाश्शुभाक्षकाः।
श्वेतास्तु व्राह्मणा ज्ञेया क्षत्रियारक्तवर्णकाः॥ २६७॥

पीता तु वैश्या विज्ञेया कृष्णाश्शूद्रा उदाहृताः।
व्राह्मणो विभृयाच्छ्वेता रक्तान् राजा तु धारयेत्॥ २६८॥

पीतान्वैश्यस्तु विभृयात् कृष्णान् शूद्रस्तु धारयेत्।
समास्निग्धादृढीस्थूलाः कण्टकैस्संयुताश्शुभाः॥ २६९॥

कृमिदष्टं छिन्नभिन्नं कण्टकैर्हीनमेव च।
व्रणयुक्तमवृक्तं च षड्रुद्राक्षाणि वर्ज्जयेत्॥ २७०॥

स्वयमेवकृतद्वारं रुद्राक्षं स्यादिहोत्तमम्।
यत्तु पौरुषयत्नेन कृतं तन्मध्यमं भवेत्। २७१॥

समान्स्निग्धान्दृढान्स्थूलान् क्षौमसूत्रेण धारयेत्।

---

263 तस्य] *conj.*; त --- K 264 पुण्यं नरो] *conj.*; --- न्नरो K 265 °प्रमाणं] *conj.*; °प्र --- णं K 266 °चणमात्रं] *conj.*; °चणमात्रकं K (unmetrical) 266 प्रक्रियैषा] *conj.*; --- क्रियैषा K 267 पृथिव्यान्तु] *conj.*; --- व्यान्तु K 268 पीता तु वैश्या°] पी --- वै --- K 268 धारयेत्] *conj.*; --- येत् K 270 व्रणयुक्तमवृक्तं] *conj.*; व्रण --- वृक्तं K 271 पौरुषयत्नेन] *conj.*; पौरुष --- न K

In Public domain. Digitization Muthulakshmi Research Academy

सर्वगात्रे तु सौम्येन सामान्यानि विचक्षणः॥ २७२॥

निघर्षे हेमरेखेव यस्यरेखा प्रदृश्यते।
तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैः॥ २७३॥

शिखायामेकरुद्राक्षं त्रिंशतं शिरसा वहेत्।
षट्त्रिंशतं गले दध्यात् बाहोः षोडशषोडश॥ २७४॥

द्वादशं मणिबन्धेपि स्कन्धे पञ्चाशतं वहेत्।
अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत्॥ २७५॥

द्विसरं त्रिसरं वापि सराणां पञ्चकन्तु वा।
सराणां सप्तकं वापि बिभृयात्कण्ठदेशतः॥ २७६॥

सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत्।
शिरसीशानमन्त्रेण कण्ठे तत्पुरुषेण च॥ २७७॥

अघोरेण गळे धार्यं तेनैव हृदयेऽपि च।
अघोरवीजमन्त्रेण करयोर्धारयेत्सुधीः॥ २७८॥

पञ्चाशदक्ष ग्रथितान् व्योमव्यापीति चोदरे।
पञ्च ब्रह्मभिरङ्गैश्च त्रिमाला पञ्च सप्त वा।

ग्रथित्वा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत्॥ २७९॥

अथ हैनं कालाग्निरुद्रं भुसुन्डः पप्रच्छ - रुद्राक्षाणां मुखभेदेन यदक्षं यत्स्वरूपं यत्फलमिति तत्स्वरूपं मुखयुक्तमरिष्टनिरसनं कमाभीष्टफलं ब्रूहीति होवाच। तत्रैते श्लोकाः—

एकवक्त्रं तु रुद्राक्षं परतत्वस्वरूपकम्।
तद्धारणात् परे तत्वे लीयते विजितेन्द्रियः॥ २८०॥

द्विवक्त्रं तु मुनिश्रेष्ठ ह्यर्धनारीश्वरो भवेत्।

---

273 °मुत्तमं विद्यात्] *conj.*; °मुत्त — यात् K 274 षट्त्रिंशतं गले] *conj.*; षट्त्रिंशतं — K 275 अष्टोत्तरशतै°] *conj.*; —शतै K 276 सराणां] *conj.*; --- णां K 279 व्योमव्यापीति] *conj.*; व्योमव्या K 280 °अक्षाणि धारयेत्] *conj.*; अक्षा --- रयेत् K 280 स्वरूपं] *conj.*; स्वरूप K 280 निरसनं] *conj.*; निरसन K 281 तत्वे लीयते] *conj.*; त — K

In Public domain. Digitization Muthulakshmi Research Academy

धारणादर्धनारीशः प्रीयतेह्यप्रियोपि सः॥ २८१॥

त्रिवक्त्रमनलस्साक्षात् स्त्रीहत्यान्दहति क्षणात्।
तद्धारणाच्च हुतभुक् तस्य तुष्यति नित्यदा॥ २८२॥

चतुर्मुखन्तु रुद्राक्षं पितामहस्वरूपकम्।
तस्यधारण मात्रेण सन्तुष्यति पितामहः॥ २८३॥

पञ्चवक्त्रं तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम्।
पञ्चवक्त्रः स्वयं ब्रह्मा पुंहत्यां च व्यपोहति॥ २८४॥

तस्य धारणमात्रेण संतुष्यति सदाशिवः।
षड्वक्त्रमपि रुद्राक्षं कार्त्तिकेयाधिदैवतम्॥ २८५॥

तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम्।
मतिविज्ञानसंपत्तिश्शुद्धये धारयेत्सदा॥ २८६॥

विनायकाधिदैवं च प्रवदन्ति मनीषिणः।
सप्तवक्त्रं तु रुद्राक्षं सप्तमात्राधिदैवतम्॥ २८७॥

सप्ताश्वदैवतञ्चैव मुनिसप्तकदैवतम्।
महतीज्ञानसंपत्तिश्शुद्धिर्धारयतस्सदा॥ २८८॥

अष्टवक्त्रं तु रुद्राक्षमष्टमात्राधिदैवतम्।
वस्वष्टकप्रियं चैव गङ्गाप्रीतिकरं शुभम्॥ २८९॥

तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः।
नववक्त्रं तु रुद्राक्षं नवशक्त्यधिदैवतम्॥ २९०॥

तस्य धारणमात्रेण प्रीयन्ते नवशक्तयः।
दशवक्त्रं तु रुद्राक्षं यमदैवमुदाहृतम्॥ २९१॥

दशाशा प्रीतिजनकं धारणे नात्र संशयः।

---

282 °नारीशः प्रीयते] *conj.*; °नारी --- यते K 285 ब्रह्मा] *conj.*; ब्रह्म K 285 पुंहत्यां] *conj.*; पुरुषहत्यां K (unmetrical) 286 संतुष्यति] *conj.*; स --- ति K 287 स्यान्महदा°] *conj.*; --- हदा° K 288 विनायकाधि] *conj.*; --- का --- K 289 सप्ताश्व] *conj.*; --- श्व K 290 अष्टवक्त्रं] *conj.*; --- क्त्रं K 291 तद्धारणा°] *conj.*; --- रणा° K 292 धारण] *conj.*; --- K 293 प्रीतिजनकं] *conj.*; प्रीतिज --- K

In Public domain. Digitization Muthulakshmi Research Academy

एकादशमुखं त्वक्षं रुद्रैकादशदैवतम्॥ २९२॥

तदिन्द्रदैवतञ्चैव सदा सौभाग्यवर्धनम्।
रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम्॥ २९३॥

द्वादशादित्यरूपं च बिभर्त्येव हि तत्परम्।
त्रयोदशमुखञ्चाक्षं कामदं सिद्धिदं शुभम्॥ २९४॥

तस्य धारणमात्रेण कामदेवः प्रसीदति।
चतुर्दशमुखं चाक्षं रुद्रनेत्रसमुद्भवम्॥ २९५॥

सर्वव्याधिहरं चैव सर्वदाऽऽरोग्यमाप्नुयात्।
मद्यं मांसं च लशुनं पलाण्डुं शिग्रुमेव च॥ २९६॥

श्लेष्मातकं विड्वराहं अभक्ष्यं वर्जयेन्नरः।
ग्रहणे विषुवे चैवमयने संक्रमे तथा॥ २९७॥

दर्शे च पूर्णमासे च पूर्णेषु दिवसेषु च।
रुद्राक्षधारणात्सद्यः सर्वपापैः प्रमुच्यते॥ २९८॥

रुद्राक्षमूलं तद्ब्रह्मा तन्नालं विष्णुरेव च।
तन्मुखं रुद्र इत्याहुस्तद्बिन्दुः सर्वदेवताः॥ २९९॥

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ अधीहि भगवन्रुद्राक्षधारणविधिं ब्रूहीति होवाच - तस्मिन्समये निदाघ-जडभरत-दत्तात्रेय-कात्यायन-भरद्वाज-कपिल-वसिष्ठ-पिप्पलादादयश्च कालाग्निरुद्रं परिसमेत्योचुः। अथ कालाग्निरुद्रः किमर्थं भवतामागमनम्? इति होवाच। रुद्राक्षधारणविधिं सर्वे श्रोतुकामा इति। अथ कालाग्निरुद्रः प्रोवाच। रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायन्ते। अथ सदाशिवः संहारकाले संहारं कृत्वा संहाराक्षं मुकुलीकरोति। तन्नयनाज्जाता रुद्राक्षा इति होवाच।

---

294 सौभाग्य] *conj.*; --- ग्य K 297 मांसं] *conj.*; --- सं K 298 अभक्ष्यं वर्जयेन्नरः] *conj.*; भक्ष्यन् वर्तयेन्नरः K 298 ग्रहणे] *conj.*; --- हणे K 299 रुद्राक्ष] *conj.*; --- क्ष K 300 विष्णुरेव] *conj.*; --- षुणुरेव K 300 कालाग्निरुद्रं] *conj.*; का --- द्रं 300 तस्मिन्] *conj.*; --- मिन् K 300 जडभरत] *conj.*; --- भरत K 300 कात्यायन] *conj.*; का --- य K 300 कालाग्निरुद्रं] *conj.*; --- ग्निरुद्रं K 300 रुद्राक्षधारणविधिं] *conj.*; रुद्रा --- णविधिः K 300 °दुत्पन्ना रुद्राक्षा] *conj.*; °दुत्प --- क्षा K 300 संहाराक्षं] *conj.*; सं --- राक्षं K

In Public domain. Digitization Muthulakshmi Research Academy

तस्माद्रुद्राक्षत्वमिति कालाग्निरुद्रः प्रोवाच। तद्रुद्राक्षे वाग्विषये कृते दशगो-प्रदानेन यत्फलमवाप्नोति तत्फलमश्नुते। स एष ज्योती रुद्राक्ष इति होवाच। तद्रुद्राक्षं करेण स्पृष्ट्वा धारणमात्रेण द्विसहस्रगोदानफलं भवति। तद्रुद्राक्षधारणं कर्तुमिच्छति शतगोदानप्रदानफलं भवति रुद्राक्षस्य यज्ञोपवीतवद्धारणमा-त्रेण सहस्रगोप्रदानफलं भवति। रुद्राक्षस्य करयोर्धारणाद्विसहस्रगोप्रदानफलं तद्रुद्राक्षे कर्णयोर्धार्यमात्रेणे एकादशसहस्रगोप्रदानफलं भवति। एकादशरु-द्रत्वं च गच्छति। तद्रुद्राक्षे शिरसि धार्यमाणे कोटिगोप्रदानफलं भवति। एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यमिति स होवाच। अथ भगवन्तं कालाग्निरुद्रं सनत्कुमारः पप्रच्छ। रुद्राक्षप्रदानफलं अस्ति वा? न वा? इति। कालाग्निरुद्रः प्रोवाच - अष्टशतरुद्राक्षान्दत्वा अष्टशतरुद्राक्षान्धार-येत्। भूवलयप्रदानेन यत्फलं अवाप्नोति तत्फलं अश्नुते। एष ज्योतीरुद्राक्ष इति होवाच।

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ। रुद्राक्षसहस्रं क्रमेण धर्तुं शक्यं वा? नेति।

अथ कालाग्निरुद्रः प्रोवाच। रुद्राक्षधारणं कर्तुं अधिवासादि प्राणप्रतिष्ठां कृत्वा रुद्राक्षसहस्रं वर्षमेकन्तु धारयेत् ब्रह्मत्वं गच्छति। द्विसहस्र रुद्राक्षाणां द्वे वर्षे धारयेत् विष्णुत्वं गच्छति। त्रिसहस्रं रुद्राक्षाणां त्रीणिवर्षाणि धारयेत् रुद्रत्वं गच्छति। न पुनरावर्तते। न पुनरावर्तते॥

श्रुतिस्मृतीतिहासेषु पुराणेष्वागमेषु च।
भूतिरुद्राक्षमाहात्म्यधारणादि समीरितम्॥ ३००॥

तत्र किञ्चित् संगृहीतं भक्तानां तुष्टिसिद्धये।
अभक्तानां प्रवृत्यर्थं विदुषां धी विशुद्धये॥ ३०१॥

अनया भूतिरुद्राक्षमाहात्म्योक्त्या परः शिवः ।
प्रीयताम् भूतिरुद्राक्षभूषणश्शांभवैस्सह॥ ३०२॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्य श्री-

---

300 यत्फलमवाप्नोति] *conj.*; यत्फ --- मवाप्नोति K 300 कर्णयोः] *conj.*; क --- योः K 303 परः शिवः] *conj.*; पर --- K

In Public domain. Digitization Muthulakshmi Research Academy

129

मत्परमशिवेन्द्रसरस्वती विरचितम्॥ इति रुद्राक्षमाहात्म्यं समाप्तम्॥ हरिः ओम्॥

303 विरचितमिति] *conj.*; विरचि --- ति K